Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
© 2025 GISRRJ | Volume 8 | Issue 1 | ISSN : 2582-0095

# भोगागमयोर्बलाबलनिरुपणम्

**डा.सुधांशुशेखरमहापात्रः**
सहाचार्यः,धर्मशास्त्रविभागस्य,राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

**सारांशः**- व्यवहाराणांदर्शनं, व्यवहारस्य पादचतुष्टयं,भोगप्रमाणविचारः,आगमप्रमाण-विचारः, भोगागमयोर्बलाबलनिरुपणम् ,विषयवस्तुश्च मयासरलरीत्या शोधलेखे उपस्थाप्यते।

**मुख्यशद्बः-व्यवहारः**-(Case) अन्यविरोधेन स्वात्मसम्बधितया कथनम्, **प्रमाणम्**-Proof,**आधिः**-बन्धकः, **आगमः**-स्वत्वहेतुः प्रतिग्रहादिः, **भुक्तिः**-भोगः।

---

व्यवहारान्नृपः पश्येदित्यादिनाव्यवहाराणां दर्शनं राज्ञः परमं कर्त्तव्यमिति[1] याज्ञवल्क्येन विहितम्। व्यवहारदर्शनञ्च भाषोत्तरक्रियासाध्यसिद्धिभिश्चतुर्भिः क्रमवृत्तिभिर्विधेयं येन वादिप्रतिपादिनोरन्यतरे विद्यमानोऽधर्मोज्ञाप्यते। तादृशे व्याप्रियमाणेमार्गे वादिप्रतिवादिभिः साध्यसिद्धिलाभाय यतमानैः क्रियापादे स्वस्वपक्षपरिपुष्ट्यर्थं विभिन्नानि प्रमाणान्युपन्यस्यन्ते। तानि च प्रमाणानि साक्षिलेख्यभुक्तिदिव्यभेदेन चतुर्विधानि दृश्यन्ते। तेषु प्रथमत्रयमानुषमन्तिमञ्च दैवमिति स्वीक्रियते। यथोक्तं[2] याज्ञवल्क्येन -

**प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्।**

**एषामन्यतमाभावे दिव्यान्यतममुच्यते।। इति।।**

एतेषुत्रिविधेषु मानुषप्रमाणेषु भोगापरपर्यायो भुक्तिरन्यतमा। भुक्तिभोगयोः केवलं प्रत्ययगतभेदो विद्यते नार्थान्तरमिति। स च भोगो द्रव्यादिनां स्वामित्वप्रतिपादकत्वेन शास्त्रे प्रसिद्धः। 'आ'समन्तादगम्यते प्राप्यते स्वीक्रियते वा येन स आगमः क्रयदानादिद्वारा स्वत्वप्रतिपादकत्वेनापि प्रसिद्धिं लभते। अत एतौ भोगागमौ यद्यपि स्वामित्वे हेतुं प्रतिपादयतस्तथापिपरिस्थितिभेदेन द्वयोर्मध्ये भेदो दृश्यते। क्वचिदागमापेक्षया भोगस्यक्वचिद्भोगापेक्षया चआगमस्य प्राबल्यं स्वीक्रियते।तत्रापि भोगसहकृत आगम आगमसहकृतभोगश्च यथा प्रमाणं तथा भोगरहितागमस्यागमरहितभोगस्य च तथा प्रामाण्यं नास्ति। अतएव विशुद्धागमयुक्तो भोग एव प्रमाणं न त्वविशुद्धागमयुक्त इति [3]नारदेन प्रत्यपादि। यथोक्तं तेन -

**आगमेन विशुद्धेन भोगो याति प्रमाणताम्।**

**अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति।। इति।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License

क्रयादीनां स्वत्वहेतुत्वात् तेषामन्यतमेव जङ्गमं स्थावरं वा धनं लब्ध्वा जनस्तत्र स्वत्वं भजत इत्यत्र नास्ति संशयः। क्रयादिकाले च क्रेत्रादिसकाशात् क्रयादिप्रमाणरुपेणागमो लभ्यते। जङ्गमात्मकं वस्तु क्रयादिना स्वीकृत्य स्वगृहे स्थापयितुं शक्यते परन्तु स्थावरादिकं (भूम्यादिकं) वस्तु स्वीकृत्य तस्य स्थानान्तरीकरणासम्भवात् तत् प्राप्तिप्रमाणसूचक आगम (sell deed) अपेक्षितो भवति। तस्मिन्नागमे विद्यमाने सति तदागमकर्त्तुरनवधानेन तदनुपस्थितौ वा कश्चिदपरस्तद् भोक्तुं प्रभवेत्।

एवं भुज्यमाने कियत्कालानन्तरं भूस्वामि यदा तदधिकर्त्तु गच्छति, तदा तद्भूमिभोक्त्रा सह विवादो जायते। एको भोगबलेन स्वत्वं स्थापयति अपरश्चागमबलेन स्वाधिकारम्। तयोर्मध्ये भूमिः कस्य स्यादिति विचारणीयम्। वस्तुतो भूम्यादिस्थावरविवादे भोगरहित आगमो यथा न प्रमाणं तथा आगमरहितो भोगोऽपि। तस्मादुभयोरप्यप्रामाण्यमिति चेन्न।

**आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्।**

**न तत् सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी।। इति।।**[4] याज्ञवल्क्यवचनादुभयोरपि प्रामाण्यमङ्गीकृतम्। अतस्तयोः कस्य दौर्बल्यं कस्य च प्राबल्यमिति वीक्षायाम् –

**आगमोऽभ्यधिको भोगाद् विना पूर्वक्रमागतात्।**

**आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो। इति।।**[5] याज्ञवल्क्यवचनादितरेतरसहितयोःप्राबल्यमितरेतररहितयोश्च दौर्बल्यं प्रख्याप्यते।यतो हि सामान्यागमो भुक्तेरपिक्षया दुर्बलः सामान्यभोगश्चागमा-पेक्षया, तथा विशेषणविशिष्टो भोग आगमाद् बलवत्तरो विशिष्टागमश्च भोगाद् बलवत्तर इति विचारितम्। अत्र तावदित्थंसमाधेयं यत् आद्ये पुरुषे साक्ष्यादिभिः प्रमाणित आगमो भोगाद् बलवत्तरः, स च भोगः चतुर्थे पुरुषे आगमादपि बलवत्तर इति विज्ञानेश्वरेण स्पष्टीकृतम्। अतस्तन्मध्यवर्त्तिकाले भोगरहितागमात् स्वल्पभोगयुक्तागमो बलवत्तरो भवति। प्रसङ्गेऽस्मिन् [6]नारदेनोक्तं यत् –

**आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा।**

**कारणं भुक्तिरेवैका सन्तता या चिरन्तनी।। इति।।**

एतेन भोगागमयोरितिरेतसाहित्येन बलाबलं तावन्निर्णेतव्यं नान्यथेति प्रतिभाति। तत्र विशेषतया भूम्यादिविवादे दानक्रयादिलब्धागमस्य पुष्ट्यर्थं स्वल्पतमोऽपि भोगो नितरामावश्यक इति निश्चीयते,यस्याभावेनागमो बलहीनो भवति। एवञ्च क्रमागतत्रिपुरुषावधिभोगरहिताया भूमेरागमोऽप्यावश्यकः, यं विना तादृशो भोगो बलहीनो भवति। अत आगमरहितां भूमिं न कोऽपि भोक्तुंशक्नुयात्,तत्र केवलभोगस्य प्रामाण्याभावात्। यदि शतं वर्षाणि यावदपि कश्चिद् तद्बलाद् भुङ्क्ते तथाप्यसौ चौरवद् दणड्य इति नारदेन स्पष्टतयाप्रत्यपादि।

यथोक्तं [7]मिताक्षरायाम् –

**अनागमं तु यो भुङ्क्ते बहुन्यब्दशतान्यापि।**

**चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः।। इति।।**

यद्येवं तर्हि –

**पश्यतोऽब्रूवतो भूमेर्हानिर्विंशतिवार्षिकी।**

**परेण भुज्यमानाया धनस्य दशवार्षिकी।। इति।।**[8]

याज्ञवल्क्यवचनस्य का गतिरिति चेदुच्यते–निरवच्छिन्नभावेन भूस्वामिनः सन्निधौ स्थित्वा निर्बाधेन यदि कश्चित्तद्भूमिं द्रव्यं वा भुङ्क्ते, तर्हि विंशतिवर्षैः सा भूमिः दशवर्षैश्च तद्धनं द्रव्यं वा तस्य ह्रियते इत्यत्र फलमात्रस्य हानिर्विवक्षिता न तु भूमेर्नापि व्यवहारस्येति[9] विज्ञानेश्वरोऽभिप्रैति। अन्यथा नारदवचनेन सह याज्ञवल्क्यवचनस्य एकवाक्यता न स्यात्। अतो निराक्रोशं विंशतिवर्षेप-भोगानन्तरं यद्यपि स्वामी न्यायतः क्षेत्रं लभते तथापि फलानुसरणं न लभते। अतस्तदर्थं विंशतिवर्षाभ्यन्तरे व्यवहारं कुर्वन् स्वामि फलमपि प्राप्नोतीति स्पष्टमेव प्रतीयते। एतावता चागमरहितस्य बहुकालिकभोगस्यापि प्रामाण्यं नास्तीति बोध्यते।

एवञ्च'आगमेऽपि बलं नैव भुक्तिः स्योकापि यत्र नो'इति[10] याज्ञवल्क्यवचनात् 'नागमेन विना भुक्तिर्नागमो भुक्तिवर्जित' इति[11] हारीतवचनाच्च तयोरनन्य-सम्बन्धेनप्रामाण्यं व्यवस्थितं भवति। अतः स्वल्पकालिकभोगयुक्तागमः सामान्य बोगापेक्षया बलवत्तरः। अत एव विशेषणविशिष्टोभोगः कः इति जिज्ञासायां[12] स्मृतिचन्द्रिकाकारेण देवणभट्टेन प्रतिपादितं यत् –

**सागमो दीर्घकालश्चाविच्छेदोपरवोज्झितः।**

**प्रत्यर्थिसन्निधानश्च पञ्चाङ्गभोग इष्यते।। इति।।**

अर्थादागमसहितो निरवच्छिन्नभावेन शतवर्षावधिकः अन्तरायरहितः अपरव (वर्जनविषयो रवः) हीनः प्रत्यर्थिसनिधानश्चेति पञ्चविशेषणयुक्तो भोग एव आगमापेक्षया बलवत्तर इति तात्पर्यम्। एतेनागमेन सह निरवच्छिन्नभावेन स्मार्त्तकालावधि (पुरुषत्रयावधि) निर्विघ्नेन प्रत्यर्थिसन्निधावापि मदीयं क्षेत्रं त्वया किमर्थमुपभुज्यत इत्याद्याभियोगं विना यदि कश्चन भूमिं भुङ्क्ते तस्य तादृश एव भोगः (तत्रेतरस्य स्वल्पकालिकभोगस्यासम्भवात्) केवलागमापेक्षया बलवत्तर इति सिद्धान्तः। एवं भोगागमयोर्बलाबलं निरुपितम्।

**उपसंहारः-** एवमेव शोधलेखेऽस्मिन् ऊच्यते प्रमाणान्तरेणावगतागमसहित एव निरन्तरो त्रिपुरुषागतभोगः कालान्तरे स्वत्वं गमयति। अवगतोऽपि आगमो भोगरहितो न कालान्तरे स्वत्वं गमयति। यस्मिन्नागमे स्वल्पापिभुक्तिः नास्ति तस्मिन्नागमे बलं सम्पूर्ण नैवास्ति। येन पुरुषेण भूम्यादेः आगमः स्वीकृतः स पुरुषः 'कुतस्ते क्षेत्रादिकम्' इत्यभियुक्तस्तमागमं प्रतिग्रहादिकं लिखितादिभिरुद्धरेत् । न तत्सुतो द्वितीयोऽभियुक्त आगमम् उद्धरेत् न वा तत्सुतः तृतीयः। तत्र द्वयो द्वितीयतृतीययोः भुक्तिरेव गरीयसी।

**सहायकसूची-**


1· या.स्मृ.व्य –1

2.या.स्मृ.व्य–22

3. व्य. प्र.पृ -153

4. या.स्मृ.व्य-28

5. या.स्मृ.व्य -27

6. व्य.प्र.पृ- 155

7.मिता.पृ-149

8.या.स्मृ.व्य-24

9.मिता.पृ-151

10.या.स्मृ.व्य-27

11.स्मृ.च.द्वि.भा.पृ-161

12. स्मृ.च.द्वि.भा.पृ-161

**सहायकग्रन्थसूची-**


1. याज्ञवल्क्यस्मृतिः-नागप्रकाशन, दिल्ली,1985.

2.मिताक्षरा( याज्ञ.टीका )- नागप्रकाशन, दिल्ली,1985.

3. व्यवहारप्रकाशः -चौखम्बासंस्कृत सीरिज, वारणसी,1987.

4. स्मृतिचन्द्रिका-गभर्णमेण्ट व्रञ्च प्रेस, महीशूर,1914.